# संस्कृत-वार्ता:

**दिनाङ्क :-28.07.2024**

**प्रात: - 06:55**

## प्रधानमन्त्री – 2047

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् सप्तचत्वारिंशदुत्तर-द्विसहस्रतमपरं विकसितभारतं प्रत्येकं जनस्य द्विसस्रतमं–महत्वाकाङ्क्षा वर्तते। ह्य: नीत्यायोगस्य नवम-प्रशासकीयपरिषद: उपवेशनं सम्बोधयन् श्रीमोदी उक्तवान् यत् राज्यं लक्ष्यमिदं प्राप्तौ उत्कृष्टभूमिकां निभालयितुं शक्नोति। प्रधानमन्त्रिणा उक्तं यत् भारतम् एतेषाम् अवसराणां लाभं गृह्णीयात् तथा अन्ताराष्ट्रिय–निवेशानुकूलं नीतीनां निर्माणं कुर्यात्। तेनोक्तं यत् भारताय विकसितराष्ट्र निर्माणदिशि अयं प्रगतिमार्ग: वर्तते। प्रधानमन्त्री कथितवान् यत् सर्वेषां राज्यानां संयुक्तप्रयासेन सप्तचत्वारिंशदुत्तर-द्विसहस्रतमपरं विकसितभारत इति स्वप्नं पूरयितुं शक्यते। तेनोदीरितं यत् विकसितराज्यानि मिलित्वा विकसितभारतं निर्मास्यन्ति। श्रीमोदी उक्तवान् यत् भारतं यूनां राष्ट्रं वर्तते। स्व कार्यकालस्य कारणेन विश्वस्मिन् बृहदाकर्षणकारं वर्तते। तेन अग्रे कथितं यत– विकसितभारतं निर्मातुं कौशलानुसन्धान–नवाचार–वृत्याधारितेषु विषयेषु बलं प्रदातव्यम्। नीत्यायोगस्य प्रशासकीय–परिषद: उपवेशनमिदं राष्ट्रपति-भवनस्य सांस्कृतिक-केन्द्रे सञ्जातम्।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अद्य पूर्वाह्णे एकादशवादने स्वीय "**मन की बात**" इति कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "**मन की बात**" इति मासिक-कार्यक्रमस्य इदं द्वादशाधिकैकशतं संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी, दूरदर्शनम्, प्रधानमन्त्री-कार्यालयः, सूचनाप्रसारण-मन्त्रालयः इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणमेव अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं रात्रौ अष्टवादने भविता।

## जयशंकर-आसियानक्षेत्रीयमञ्चः-

विदेशमन्त्री डॉ. एस.जयशंकरः उक्तवान् यत् केवलं अन्ताराष्ट्रियसहकार्यं वैश्विकसामान्यस्य सुरक्षां वैश्विकवस्तूनाम् वितरणं च सुनिश्चितं कर्तुं शक्नोति। ह्यः लाओस् जनलोकतांत्रिकगणराज्यस्य वियनतियाने-नगरे एकत्रिंशत् तमे आसियान-क्षेत्रीय-मञ्चे भागं गृहीत्वा डॉ. जयशंकरः अवदत् यत् समाधानं केवलं आर्थिक-राजनैतिक-प्रौद्योगिकी-संपर्क-माध्यमेन एव उद्भवितुं शक्नोति।

**इजरायल-आक्रमणः**

मध्यगज़ा-क्षेत्रे इज्रैल-देशस्य आक्रमणस्य अनन्तरं न्यूनातिन्यूनं त्रिंशत् यावत् फिलिस्तीनि-नागरिकाः मृत्युमुपागताः, शततोप्यधिकाः च व्रणिताः, यस्मिन् विद्यालये आहताः विस्थापिताः च फिलिस्तीनि-नागरिकाः आश्रिताः आसन्। इज्रैल-सैन्येन उक्तं यत्, आक्रमणस्य लक्ष्यं हमास-नियन्त्रितं विद्यालयपरिसरस्य अन्तः स्थितं नियन्त्रणकेन्द्रं आसीत् यस्य प्रयोगः इज्रैली-सैनिकानाम् उपरि आक्रमणं कर्तुं, शस्त्राणां संग्रहणार्थं च क्रियते स्म।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

**क्रिकेट**

nत्रयाणां स्पर्धानां श्रृंङखलाया: विंशति-प्रतिविंशति-अन्तराष्ट्रिय-पुरुष-क्रिकेट-प्रतिस्पर्धायाम् गतसायं श्रीलंकाया: पल्लेकेले क्रीडांगणे भारतदलेनं श्रीलंकादलं त्रिचत्वारिंशत् धावनांकै: पराजितम्

**।।इति वार्ता:।।**